# चतुर्थोऽध्यायः

# प्राच्यपाश्चात्ययोः

# लोकतन्त्रविषयेऽभिमतम्

Democracyलोकतन्त्रम् इत्यनयो: शब्दयो: विविधताया: विषये चर्चाया: पूर्वं प्राच्यजगति पाश्चात्यजगति च राजधर्मस्योत्पत्तिविषये ज्ञातव्य: । यत: क्रमात् तेषां विषयाणां चर्चापुरस्सरं राजधर्मे लोकतन्त्रस्य Democracy इत्यस्य च वैविध्यं प्रस्तोतुं शक्यते। प्रथमं पाश्चात्यजगति Nation इत्यस्यावधारणा: व्याख्यातव्या:। पाश्चात्यजगति राष्ट्रंराष्ट्रियतां च स्वीकृत्य निर्मिताधारणा अद्यापि अस्पष्टा। प्रसङ्गेऽस्मिन् एम.एस. गोलवलकरमहोदयस्य 'राष्ट्र'इति शीर्षके ग्रन्थे 'पूण्याहवाचन्' इति प्राक्कथने दत्तोपन्त ठेंगडे महोदयेन उत्थापिता: पाश्चात्यपण्डितानां राष्ट्रतत्वस्य परिभाषा: उल्लिख्यतेऽत्र -

१. राष्ट्रशब्दं Nationइति शब्देन सह विचार्यते चेत् Zangwile महोदय: 'Principle of Nationalities'इति शीर्षके ग्रन्थे लिखति – "Nationalism इति विषय: चिन्ताघनारण्येषु एक यत्र च राजनीति संवादशास्त्रं च विकसत:" ।[१]

२. 'A century of Nationalism'इति शीर्षके ग्रन्थे H.L. Featherstone लिखति – "Nationalism इति पदं वैज्ञानिक्यां परिभाषायां व्यक्तिकर्तुं न शक्यते इति" ।[२]

३. Florian Znaniecki अग्रे गत्वा समुद्घोषयति यत् "Nation इति शब्दस्य संज्ञानिर्धारणक्षेत्रे सन्देहास्पदत्वात् विविधानां विश्वकोषाणां सम्पादका: तेषां विश्वकोषेभ्य: Nation इति शब्दमेव अपसारितवन्त:। उदाहरणरूपेण International Encyclopedia, Encyclopedia of Social Sciences, Encyclopedia Britanicaand Woterbuchder State Swissense Hafte इत्यादीनां नामानि वयं प्राप्तवन्त:इति"।[३] अधिकतरा: इतिहासविद: राष्ट्रत्वविषयं नूतनतया निर्मित: सिद्धान्त: इति मन्यन्ते।[४]

४. G.P. Goochमहोदयेनोक्तम् –"Nationalism इत्यस्य धारणा: फ्रान्सराज्यक्रान्तित: समुत्पन्ना:इति"।[५]

५. पुनरपि Max Weber महोदयेनNationalism इति पदस्य व्याख्याने प्रोक्तम् –

“Nationalism इति नाम एतादृश: रसपुञ्जोऽस्ति यस्य शुद्धप्रकाशनं केवलं स्वस्य प्रकाशनद्वारा एव भवति तथा च तादृशावस्थां जनयति या साधारणतया पल्लविता भवति”।[६]

तथैव एतस्मिन् विषये शिवाचार्यमहोदयेन तस्य ‘Nation and Nationalism and Social structure in Ancient India’ इति शीर्षके ग्रन्थे उच्यते यत् –“League of Nation अपि State तथा च Nation इत्यनयोर्मध्ये स्थितस्य सन्देहस्य निराकरणं कर्तुमसमर्थ:। भारतीयचिन्तका: विश्वं सावधानीकृत्य तादृश्या: अशुद्धाया: व्याख्याया: परिणामविषये सूचितवन्त:। पाश्चात्यजगति इदानीमपि UNO मध्ये States इत्येतेषामेव सदस्यता दृश्यते। अतएव इदानीमपि विषयेऽस्मिन् तेषां स्पष्टधारणा नास्तीति प्रतीयते”।[७]

इदानीं राष्ट्रशब्दस्य विषये चिन्तयते। अत्र राष्ट्रमिति तत्त्वं ज्ञानीभि: तत्वदर्शिभिश्च विश्वकल्याणेच्छयाविर्भावं चक्रु:।[८] जना: तं राष्ट्रमिश्वरत्वेन मेनिरे।[९] राष्ट्रमिति पदं यावत् विशालं तन्न कस्मिन्नपि सिम्नि आवद्धम्। तत्तु परमात्मा इव निराकारत्वं भजते। तद्राष्ट्रं साकारीभूय: देशरूपेण समागच्छति। यथा भारते समाविष्कृतं राष्ट्रमिश्वरत्वेन गण्यते, तथा च “यस्यैमे हिमवन्तो महित्वा”[१०] प्रभृति मन्त्रेषु उल्लेखितवत् एक परिसरवेष्टिताञ्चलं देशरूपेण प्रख्यातम्। देशस्था: जना: अपि स्वानुगत्यं प्रकट्य तं राष्ट्रदेवं विहाय कस्मै वा हविं समर्पयाम इति देशभक्त्या: समुत्कृष्टा भावना पोषयति “कस्मै देवाय हविषा विधेम”[११] इति।

वैदिकीराष्ट्रे नागरिकताया: चिन्तनं नैवोल्लेखितम्। मनुष्य: राष्ट्रस्य सन्ततिर्भवति अत: एव भक्ताश्च भवन्ति। ते स्वकीये हृदये राष्ट्रं धारयन्ति।[१२] वैदिकसिद्धान्ते Survival of the fittest इति सिद्धान्तानुसारं सन्त्रस्तजनानां परित्राणार्थं राष्ट्रस्य निर्माणं न जातम्। वरञ्च सद्धर्माचरणेन कर्ममयजीवनपालिता: वैदिकजना: इष्टदेवरूपेण राष्ट्रदेवं स्वीकुर्वन्ति। राष्ट्रभक्ता: अपि इष्टदेवस्य शरणागतो भूत्वा इहलौकिकसुविधानां सम्भोगपूर्वकं पारलौकिकोत्सर्गसाधने व्रतीर्भवन्ति इति वैदिकराष्ट्रदर्शनस्य सिद्धान्तम्।

**पाश्चात्यजगति विविधशासनपद्धतीनां क्रमविकास: -**

पाश्चात्यजगति हब्स-लक-रुसोसदृशानां विदुषां मतानुसारं प्राकृतिकावस्था त: जनानां परित्राणार्थं State इति निर्माय तस्य सञ्चालनार्थं त्रस्तजनानां परित्राणार्थञ्च स्वकीयान् सर्वान् अधिकारान् एकस्मिन् व्यक्तौ व्यक्तिसमूहे वा समर्प्य जना: तं तान् वा मुख्यशासकत्वेन चितवन्त:। अतएव तं राजानं मानवदेव (लेवियाथन) इति उक्तवन्त:।[१३] तथैव लक् इति दार्शनिकेनापि प्रोक्तं यत् सामाजिकानुबन्धानुसारं (Social contract theory) स्थितोजना: एकं प्रशासकं चीतवन्त: इति। तदनन्तरं रुसो अपि सामाजिकानुबन्धस्य समर्थनपुरस्सरं प्रशासकचयनस्य मतं पोषयति। स: विशेषत: Return to nature सिद्धान्तमनुसृत्य एतद् सर्वमुदीरितवान्। अनेन प्रकारेण विश्वे विभिन्नेषु भागेषु प्रशासकं जना: चीतवन्त: इति तेषां चिन्तनम्।[१४] प्रशासकद्वारा प्रवर्तितेषु शासनेषु वारं वारं शासनपद्धते: परिवर्तनं जातम्। गच्छत्सु कालेषु व्यक्तिवाद: समाजवाद: मार्क्सवाद: इत्यादिनां क्रमश: प्रचलनं समापनं च जातम्। श्रेष्ठशासनपद्धतिमनुसृत्य पाश्चात्यजगति राजनीतिकधारायां Democracy उत: वा लोकतन्त्रात्मकं शासनमेव जना: श्रेष्ठत्वेनाङ्गीकृतवन्त: इति।

**प्राच्यजगति विविधशासनपद्धतीनां क्रमविकास: -**

केषाञ्चित् विदुषां मतमस्ति यत् युगविभाजनानुसारं प्राच्यजगति आदौ आदियुग: आसीत्। तदनन्तरं देवयुग: पुनश्च मानवयुग: इत्येतेषां प्रचलनमभूत्।[१५] आदियुगस्यविषये वर्णनं महाभारते शान्तिपर्वणि प्राप्यते।[१६] जैमिनीयब्राह्मणे २.३५ संख्यके मन्त्रे देवयुगस्योल्लेखस्योद्धरणं भगवतदत्तेन तस्य “भारतवर्षस्य बृहदितिहास:” इति शीर्षके ग्रन्थे उल्लेखितम्।[१७] देवयुगादनन्तरं मानवयुग: प्रारभ्यते। अत: देवयुगपर्यन्तं वैराज्यवाद: आसीत्। मानवयुगप्रवर्तनकालात्पूर्वं लोकेषु विकृतीनां प्रभाव: प्रारब्ध:। तदनन्तरं मात्स्यन्यायानुसारं दुर्वलान् प्रति अत्याचार: संघटयितुं प्रारब्ध:। तत: क्षत्रविहीना: प्रजा: राष्ट्राराधनानिमित्तं

राज्यसंस्थां निर्माय कमपि शक्तिमन्तं ज्ञानशीलं वा व्यक्तिं राजारूपेण चीतवन्तः।[१८] तेन सञ्चालिता शासनपद्धतिः कापि स्यात् परन्तु गच्छत्सु कालेषु साम्राज्य- भौज्य-स्वराज्य-पारमेष्ठ्यमित्यादीनां पद्धतीनां प्रचलनमभूत्। तेषु स्वराज्यपद्धतिमेव श्रेष्ठत्वेन बुधाः गणितवन्तः।[१९] एतदर्थं मानवयुगे प्रवर्तितस्य स्वराज्यस्य उत्कृष्टतां वीक्ष्य एतत्परं वर्तमानयुगस्य पाश्चात्यदर्शनानुगुणं श्रेष्ठतमां शासनपद्धतिं Democracy नामाख्यां लोकतन्त्रपद्धतिं स्थापयित्वा अनयोर्मध्ये वैविध्यतां स्पष्टीक्रियते।

वस्तुतः राजनीतिविज्ञानं समाजशास्त्रस्यांगत्वात् तस्य सिद्धान्तादयः विज्ञान-गणितशास्त्रवत् ध्रुवरूपेण नैवोपलभ्यन्ते। समाजस्य परिवर्तनेन सह राजनीतेः सिद्धान्तानामपि परिवर्तनं परिवर्धनं च संभवतीति। लोकतन्त्रमिति सिद्धान्तस्यापि समयानुसारेण तस्यादर्शे व्यवहारिकपक्षे च परिशोधनं जातम्। सम्प्रति समुपलब्धा लोकतान्त्रिकव्यवस्थापि वस्तुतः एकाधिकानां राजनैतिकानां प्रशासनिकानां वा व्यवस्थानां प्रयोगेण उपलब्धानां निष्कर्षरूपाणां उच्चतम-आदर्शाणां सामग्रिकरूपं विद्यते। यत्र (लोकतन्त्रे) व्यक्तिस्वाधिनता-सामग्रिक विकाश-प्रगतेश्चोपरि विशेषप्राधान्यं दीयते। अस्यैव लोकतान्त्रिकादर्शस्योद्भव-विकाश-सैद्धान्तिकपक्षं चानुसृत्य प्राच्यपाश्चात्यराजनैतिकपण्डितानां मतवैविध्यतायाः आलोचनात्र अस्माभि उपस्थापनस्य प्रयासः क्रियते।

**१.शाब्दिकार्थविश्लेषणम्** –शाब्दिकार्थविश्लेषणावसरे सर्वप्रथमं Democracy इति पदमभिधानेषु प्रदर्श्यते। तत्र Democracy इति शब्दस्य मूलशब्दस्तु ग्रीकभाषायाः democratia इति प्राप्यते।[२०] अयं democratia इति पदमपि demos एवं krats शब्दद्वयोः संयोगाज्जातः। एतयोः शब्दयोः अर्थं क्रमशः ‘जन’एवं ‘शक्ति’ वर्तते।[२१] तत्र democratia इति पदस्यार्थः rule of the people इति उक्तं वर्तते।[२२]

किन्तु अस्माकं प्राच्यदेशे समुपलब्धेषु प्राचीनतथ्येषु साहित्येषु च ‘लोकतन्त्रम्’इति

पदं प्रत्यक्षरूपेणोल्लेखं नैवोपलभ्यते। किन्तु लोकतान्त्रिकवैशिष्ट्येन मण्डिताविशिष्टप्रकारस्य शासनपद्धतिरेका वैदिकसंहितासूपदिष्टास्ति। “महते जानराज्याय”[२३]इत्यनेन वैदिकवाक्येन जानराज्यनाम्ना एका शासनपद्धति: उल्लेखिता:, यत्र तस्य महत्वता वरिष्ठता च व्याख्याता । जानराज्यमितिशब्दस्तु “जनतायैहितं राज्यम्” “जनता द्वारा निर्मितं राज्यम्” इत्यनेनार्थविश्लेषणेनास्य शासनपद्धते: लोकतन्त्रात्मकता प्रकाश्यते।

जानराज्यमिति पदमपि ‘जन’एवं ‘राज्य’इति पदद्वयो: संयोगाज्जात:। जनशब्दस्तु ‘जनि-प्रादुर्भावे’इति धातौ मानिन्प्रत्ययसंयोगेन निष्पद्यते। वस्तुत: एकस्मादेव पितृपुरूषात् जन्मग्रहणकारीणां व्यक्तिनां ‘जन’इति संज्ञा भवति। पुनश्च सामग्रिकरूपेण एकस्यादर्शस्य पालकानां व्यक्तिविशेषाणां अपि ‘जन’ इतिसंज्ञा भवति। वैदिककोषेऽपि अस्य जनशब्दस्य द्वौ अर्थौ स्वीकृतौ स्त:।[२४] एक: व्यक्तिविशेष: अपर: सामूहिकरूपेण जातिविशेषश्च। ‘जनस्य गोपा’पालको वाइति वैदिकवाक्ये प्राप्तं ‘जन’ इति पदं जनसाधारणानां कृते प्रयुक्तमस्ति।

राज्यशब्दस्तु शासनसम्बन्धितोऽस्ति। अथर्वसंहितायां[२६] तथा ब्राह्मणादिग्रन्थे[२७]सार्वभौमसत्ताया: कृते राज्यशब्दस्य प्रयोग: परिलक्षित:। कोशग्रन्थेपि[२८]तस्यैवार्थे राज्यपदस्य प्रयोग: कृत:। ऋग्वेदे राज्यशब्द: राष्ट्रार्थे प्रयुक्त:।[२९] अथर्ववेदेऽपि[३०] प्रायश: तदेवार्थं व्यनक्ति। किन्तु नवीनप्राच्यराजनैतिकविश्लेषका: प्राचीनतथ्यानामुद्धरणेन राज्य-राष्ट्रयोर्मध्ये वैविध्यं प्रकटयन्त:। राज्यं शासनपर्यायतत्वं[३१] राष्ट्रं सांस्कृतिकैक्यताया: समन्विततत्वरूपेण[३२] विश्लेष्यते स्म। शुक्लयजुर्वेदे अस्य राज्यतत्वस्योल्लेखं लोकशब्देन व्यक्तिकृतम् - “तं लोकं पुण्यं प्रज्ञेयं” इति।[३३] अस्य लोकस्य राज्यस्य वा प्रगतिर्निमित्तं ब्रह्मक्षत्रयो: सामूहिककार्यस्यावश्यकता स्यात्। वैदिकसाहित्यसमालोचक-कपिलदेवेनापि राज्यतत्वस्य विश्लेषणावसरे चतुर्विधानां तत्वानामुल्लेखं कृतं – १.ब्रह्म २.क्षत्र ३.विश् ४.राष्ट्रश्च।[३४] अस्तु तावत् वर्तमानस्य राजनीते: राष्ट्रतत्वस्य यत् व्याख्यां समुपलभ्यते तदेव व्याख्या वैदिकराजनैतिकपण्डितै: राज्यस्य कृते

विहिता। अत: जनानां राज्यम् इति जनराज्यम्। जनराज्यस्य भाव: जानराज्यमिति जानराज्यस्य व्याख्या।

**शाब्दिकार्थे वैविध्यम् –**

१. Democratia इति पदे स्थितं demos इत्यस्यार्थ: people इति उल्लेखितम्। किन्तु तत्र स्पष्टं नास्ति यत् के ते जना:। परन्तु जानराज्यपदे एतत् स्पष्टं विद्यते। पदेऽस्मिन् प्रयुक्त: जनशब्द: जननार्थे प्रादुर्भावार्थे च वर्ण्यते। एकस्मिन् वंशे, एकस्मिन् आदर्शे एकस्यां संस्कृत्याञ्च प्रादुर्भूतानां व्यक्तिविशेषाणां 'जन' इति संज्ञा। अत: अनेन जनपदेन एकस्य राष्ट्रस्थनागरिकस्य बोधो भवति।[३५] नीतिवाक्यामृतानुसारेण जनशब्दस्य तात्पर्य: 'वर्णाश्रमधर्मेण युक्त' इति चोक्तम्।[३६] कौटिल्येनापि "नह्यजनोजनपदो राज्यं जनपदं वा भवतीति प्रोक्तम्।"[३७] कौटिल्यस्य अस्यवाक्यानुसारं केवलं भुखण्डजनसाधारणयोर्संयोगेन राज्यं न भवति तत्कृते तु उत्कृष्टानागरिकाणामावश्यकं स्यादिति भाव:।

२. Democratia इत्यस्यार्थ: rule of the people इति प्राप्यते। अत्र जनसाधारणेनrule इत्याख्यस्य तेषामुपयोगी नीतिनिर्धारणस्योल्लेखं वर्ण्यते। किन्तु वैदिकजानराज्ये ये विधय: गृहीता: तेषु सर्वेषां जनसाधारणानां सहयोगं नासीत्। तत्कृते तु वैदिकऋषिभि: तेषां ज्ञानयज्ञरूपि तपस्यया (अनुसन्धानेन) प्राप्तं ज्ञानं जनतानां कृते संप्रयुज्यमिति प्रमाणयति श्रुति:।[३८]

**२. परिभाषाया: विश्लेषणम् –**

राजनीतिशास्त्रे विकशितं लोकतन्त्रनामधेयं व्यवस्थाविशेषं सर्वेषां कृते मौलिकप्रयोजनरूपेण अपरिहार्यतत्वरूपेण च परिगण्यते। एतया व्यवस्थया एव समाजस्थसर्वेषां जनगणानां समाजं प्रति स्थितेषु तेषां कर्तव्यविषये उत्तरदायित्वविषये च बोधं कारयति। अनया एकस्य समाजस्योन्नतेर्निमित्तं सर्वेषां सामग्रिकविकाश:, भ्रातृत्वबोध:, समताया: ऐक्यतायाश्च बोधं

कारयति। समाजस्योत्थाननिमित्तं स्वस्याभिमतप्रदानमाध्यमेन स्वाधीनतायाः अनुभूतिरपि जायते। एतादृशस्य अतीवोच्चविचारेण परिपूर्णः सर्वमङ्गलमयी सिद्धान्तोऽयं राजनैतिकक्षेत्रे विकशिते सत्यपि सम्प्रति अर्थनैतिक-शिक्षा-समाजव्यवस्थाषु अपि अस्यादर्शस्य विस्तारः परिलक्ष्यते। अनेकैः राजनैतिकपण्डितैः लोकतन्त्रमिति तत्वस्योपरि विचार-विमर्श कृतेऽपि अस्य तत्वस्य परिसीमानिर्धारणे ते सर्वदा असफलाः इव प्रतीयन्ते।

पाश्चात्यजगति प्रादुर्भूतानां राजनैतिकचिन्तकानांSolon तः Plato, Aristotle चेत्यादिनां कालपर्यन्तम् (ईशापूर्व शष्ठशताब्दितः चतुर्थशताब्दिपर्यन्तम्) यूनानीचिन्तने विदुषां मध्ये प्रतिद्वन्दिभावनया स्वमतोपस्थापनस्य प्रथा प्रचलिता आसीत्। तत्र सञ्चलतां राजनीतिकविषयाणां चर्चाभ्यः Democracy इत्यस्य धारणा समजनि इति लोकतन्त्रस्य स्थापना विषये चर्चिता पाश्चात्यधारणा।[३९] तत्रस्थेषु राजनैतिकपण्डितजनेषु Isocrates, Socrates, Plato, Aristotle इत्यादीनां नामानि लभ्यन्ते। V. Venkata Raoतदीये 'A History of Political Theroies'इति शीर्षके ग्रन्थे विविधराजनैतिकपण्डितैः Democracy विषयेप्रदत्ताः परिभाषाः उल्लिखिताः। तत्र पाश्चात्यदार्शनिक-Isocratesमहोदयेन प्रोक्तम् – "एकस्य सुसन्तुलितस्यमध्यस्तरीयस्य संमिश्रितप्रकारस्य लोकतन्त्रं वर्तते, यत् अद्यप्रचलितस्य लोकतन्त्राल्पतन्त्रवत् च नैव परिलक्षितमिति । एतद् सिद्धान्तं केवलं तदनीन्तनानां एथेन्सजनानां रोगनिराकरणार्थं समुल्लेखितं समाधानमासीदिति तस्यैवाभिमतम्"।[४०]

Socratesइत्यस्य मतेन Athenian Democracyइति व्यवस्था न स्वीकरणीया, अतएव Athenian Democracy इति सिद्धान्तः न स्वीकृतः। अतः स ज्ञानक्षमतयोः संयुक्तः व्यक्तयः एव शासनतन्त्रं सम्यकतया सञ्चालयेतुं समर्थाः भवति।[४१] तथैव अन्येऽपि पण्डिताः Democracy विषये विभिन्नाः धारणाः दत्तवन्तः। तेषु सञ्जातेभ्यः वादविवादेभ्यः Democracy इत्यस्या धारणा क्रमशः विकशिताः। अन्ततोगत्वा Democracy इत्यस्य

परिभाषायां आब्राहमस्य “Of the people by the people for the people” एव Democracy अस्तीति धारणा सञ्जाता।

प्राच्यजगति अतीवपुरातनकालादेव वैराज्यव्यवस्थाया: स्खलनादनन्तरं जानराज्यम् इति शब्द: लोकतन्त्रस्य समानतां भजते। तदनन्तरं जानराज्यस्य चरित्रं स्वराज्यपद्धत्या स्वाराज्यपद्धत्या वा भवेदिति अभिप्रायेण पद्धतिरेषा वैदिकर्षिभि: श्रेष्ठत्वेन स्वीकृता। शुक्लयजुर्वेदे[४२] राजसूययज्ञावसरे राज्ञं अभिषेकं विदधाना: पुरोहिता: “महते जानराज्याय” इत्युक्त्वा महत्जानराज्यस्य निमित्तं अभिषेकं कृतवन्त:। तस्य पदस्य महत्ततां वर्णयन्शतपथेब्राह्मणे[४३] जानराज्यस्य यशोगानं वर्णितम्। जयसवाल महोदयेन अपि एकस्य राष्ट्रस्य जनतां राष्ट्रियप्रकाशकरुपेणोपस्थाप्य जानराज्यस्य उत्कृष्टव्याख्या दत्ता।[४४] जानराज्येति प्रशासनव्यवस्थाया: वैशिष्ट्यं विश्लेषयन् शुक्लयजु: संहितायांप्राप्यते – “इमं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय” इति। अर्थात् – महत् क्षात्रतेजनिमित्तं, श्रेष्ठता-प्रभूत्वता निमित्तं , जानराज्यनिमित्तं च इन्द्रत्वरूपदैविगुणेन विभूषितं (शासकजनं) प्रेरयितुं आह्वानं क्रियते, येन शासक: शत्रोर्संहारपूर्वकं शासनं परिचालयेतुं समर्थो भवेदिति भाव:। अस्य मन्त्रस्य केचन विशिष्टविन्दव: अत्रोपस्थाप्यन्ते -

१. जानराज्यं क्षात्रतेजस: वृद्धिनिमित्तं प्रादुर्भूतम्। क्षात्रतेज: एव क्षत्रस्य क्षत्रत्वम्। राजनैतिकशक्तेरपर: नामास्ति क्षत्रम्। अत: जनसाधारणानां क्षत्रतेजवृद्धिनिमित्तं राजनैतिकशक्ते: वृद्धिनिमित्तं वा जानराज्ये सर्वाधिक सुरक्षाप्रदानस्य व्यवस्था विहितास्ति। इतोऽपि जनसाधारणानां राजनैतिकसचेतनताया: विकाशं जानराज्ये एव संभवति।

२. जानराज्ये जनसाधारणा: सर्वप्रकारेण मुख्यत्वेनोपस्थापिता:। यतोहि शासकचयनं तेषामिच्छानिच्छयोरूपरि निर्भरशिलो वर्तते।

३. अग्रेगत्वा “इन्द्रस्य इन्द्रियाय” इत्यनेन वाक्येन जानराज्यस्थेषु जनेषु परमैश्वर्ययुक्त-दीव्यशक्तेः संञ्चारो विद्यते। यतोऽहि पूर्वोक्तमन्त्रे इन्द्रं शासकविशेषं वा राजनैतिकशक्तिप्रदानार्थं जानराज्यस्थजनान् प्रेरणस्य आह्वानं श्रूतम्।

४. सः जानराज्यस्य शासकः प्रजावर्गात् प्राप्तेन विशेषशक्त्याधारेण एव स्वस्यराज्यं ‘असपत्नं’ शत्रूरहितं च कर्तुं शक्नुवन्ति।

कुत्रचित् जानराज्यं लोकतन्त्रात्मकशासनपद्धतिरूपेण उल्लिख्यते।[४५] वैदिकजनसाधारणाः स्वदेश-स्वराष्ट्र-स्वप्रशासनव्यवस्थायाः सुसृंखलितरूपं परिलक्ष्य गौरवत्वमनुभवन्ति। जानराज्यमिति पदे प्रयुक्तं जन इति पदं सायणेन ‘भाट्’[४६]इति प्रोक्तम्, महीधरेण ‘यजमानम्’[४७] इति दयानन्देन ‘धार्मिकजन’[४८] इत्यादिपदैः सम्बोधनं कृतं तथापि तस्य वास्तविकार्थस्तु जनसाधारणः एवास्ति। एकस्य राज्यविशेषस्य स्थायीजनानां यद्राज्यं प्रशासनव्यवस्थां वा तेषामिच्छया सृज्यते तदेव जानराज्यमिति जानराज्यस्य व्याख्या।

**परिभाषायां वैविध्यम्** –

यद्यपि Democracy इति पदस्य परिभाषां प्रयच्छन् लिङ्कनमहोदयेन लोकस्य-लोकाय-लोकेन च निर्मितं यत् तन्त्रं तत् लोकतन्त्रं इति वदति। परन्तु संस्कृतपण्डिताः ततोऽपि स्पष्टतया लोकतन्त्रस्य व्याख्यामकुर्वन्। तत् तन्त्रं लोकतन्त्रस्य सर्वासु विभक्तिषु संयुज्य व्याख्यायते चेत् तादृशानि न केवलं त्रिणि अपितु सप्तविभक्त्यनुसारं सप्तपरिभाषा संप्राप्यन्ते।

**३. लोकतन्त्रमिति सिद्धान्तस्योत्पत्तिः क्रमविकाशश्च** –

पाश्चात्यराजनैतिकधारणायां समाजव्यवस्थायाः उत्थानस्यसमान्तरालरूपेण समाजशास्त्रान्तर्गतानां शिक्षा-अर्थनीति-राजनीतिप्रभृतिधारणानामपि विकाशः जातः। तत्र कतिचिद्राजनैतिकपण्डिताः सामाजिकानुबन्धननीत्याधारेण[४९] शासकनिर्धारणेन समाजं

सृंखलितं कर्तुं कटीवद्धा: परिलक्ष्यन्ते। समाजव्यवस्था सुशृङ्खलिता जाते सति राज्यसंस्थाया: उद्भव: तदनन्तरं राजतन्त्रं, सामन्तप्रथा-साम्राज्यवाद-समाजवाद-प्रभृतिराजनैतिकचिन्तनानां प्रादुर्भाव सञ्जात:। तेषां प्रत्येकराजनैतिकविचाराणामनुशीलनेन उत्कृष्टमादर्शमेकत्रीकृत्य Democracy इति नामधेयं लोकतन्त्रात्मकं प्रशासनं ख्रिष्टपूर्वपञ्चमशताब्द्यां पाश्चात्यजगति प्रादुर्भूतमिति प्रमाणितं तथ्यम्।

पाश्चात्यराजनीते विविधराजनैतिकचिन्तनानां भावधारणानां वा उत्पत्ति: विकाश: परिलक्ष्यन्ते। सम्प्रति कतिपयचिन्तनानां विलुप्तिरपि जाता। किन्तु लोकतान्त्रिकभावधाराया: विषये तु प्राच्यराजनीतिविद: प्रारम्भकालादेव जागरूका: परिलक्ष्यन्ते।

शुक्लयजुसंहितायां[५०] लभ्यते परमात्मन: सकाशात् विराजस्योत्पत्तिरिति। स: विराट् एव अधिपुरूषं सृजति। अधिपुरूषादेव विविधानां ब्रह्माण्डानां सृष्टिर्भवति। स: विराट् शाश्वतनियमानां मूर्तरूप: आसीत्।[५१] तत: एव वैराज्यस्य सृष्टिरिति।[५२] यतोहि वैराज्यावस्थायां स्वस्य ज्ञानवलेन स्वयमेव स्वस्यानुशासनार्थं जना: समर्था: परिलक्षन्ते स्म। स्वस्य विवेकबुद्ध्या उचितानुचितकार्यस्य पर्यावेक्षणपूर्वकं मंगलमयानां विकाशमयानां भविष्यत्प्रजन्मानां कृतेऽपि उपयोगिनां कार्याणां परिचालनेन स्वस्य वैराज्यावस्थाया: उच्चतमादर्शस्य दृष्टान्तं ते अस्मान् पुरत: समुपस्थापितवन्त:।[५३] वैराज्यावस्थायां ज्ञानिन: धर्मानुरागिण: विवेकशीला: विराट्पुरूषा: (वैराज्यस्य जना:) स्वशक्त्या: प्रभावात् शासकरहितं प्रशासनव्यवस्थां[५४] परिचालयन्ति स्म।

वैराज्यावस्थां वर्णयन् स्वामी करपात्रीजी महाराज: उल्लिखति – "तस्मिन् समये सर्वे जना: उन्नतविद्यानां उद्भवस्थलं वेदं तदनुसारं सञ्चालितमर्थशास्त्रं च सम्यकतया अभ्यासं चक्रु:। अत: धर्मार्थकाममोक्षाणां समुचितं विवेकपूर्वकं सुव्यवस्था सञ्चालिता आसीत्। सभ्यता-संस्कृति-ज्ञानविज्ञानानाञ्चोन्नति: पराकाष्ठां प्रापु। रुसो मार्क्सादि कल्पितं भविष्यतस्य

स्वर्णयुगमपि तस्य तुलनायां नगण्यमासीत्" इति।[५५]

किन्तु परवर्तिनिकाले वैराज्यस्था: धर्मेणपाल्यमाना:नरा: स्वभावेन विनष्टा:। तत: तान् मोह: आविशत्।[५६] नरलोके वेदा: (ज्ञानराशय:) विनाशा: विलुप्ताश्च सञ्जाता:। तेन धर्मलोपोऽपि जात:।[५७] विषयमेतत् व्याख्यायन् महाभारते प्रोक्तम् – तदनन्तरं मात्स्यन्याय: सञ्जात: इति।[५८] यथा पाश्चात्यदेशे नवजागरणात्पूर्वं धनीदरिद्रयोर्मध्ये, मालिक-श्रमिकयोर्मध्ये, शासक-शासितयोर्मध्ये च दुर्वलीनां शोषणेन समाजे श्रेणिविभाजनं संघटितं, तथैव प्राच्यदेशेऽपि शासकजना: दुर्वलीजनान् निर्धनीजनान् च शोषणेन वैराज्यस्य श्रृङ्खलितसमाजे वैविध्यतामानयति स्म। वैराज्यस्योच्चतमादर्शानां नाशात्परं पुन: सामाजिकानुवन्धसिद्धान्तेन शक्तिमन्तं पुरूषविशेषं स्वस्य नायकरूपेण वरणस्य तथ्यं वयं प्राप्नुम:।[५९] तदनन्तरं साम्राज्य-भौज्य-स्वराज्यादिविविधानां राजनैतिकादर्शानां परिकल्पनं जातम्।

अस्या: वैराज्यव्यवस्थाया: लोकतन्त्रस्य चरमोत्कर्षस्य भावनाया: पतनस्य कारणरूपेण अस्माभि: महाभारते वर्णितस्य मात्स्यन्यायस्य दृष्टान्तमुपलभ्यते। वैदिकसंहितासु अथर्वसंहितायामेव मात्स्यन्यायस्योल्लेखं समुपलब्धम्। तत्पूर्ववर्ती संहितासु मात्स्यन्यायस्योल्लेखाभावात् पूर्वकाले वैराज्यस्यपतनविषये चिन्ता चर्चाया: अभावं प्रमाणयति। यतोऽहि संहिताष्वेव साम्राज्य-जानराज्यादीनां अनेकानां शासनविधानां वर्णनं प्राप्यते। ते सर्वे एव वैराज्यादनन्तराव्यवस्था इति।

परवर्तीनि साम्राज्य-भौज्य-पारमेष्ठ्यादि-शासनविधेषु आंशिकरूपेण लोकतान्त्रिकभावधाराया: अवस्थिति: परिलक्ष्यते। किन्तु स्वराज्यं जानराज्यञ्च सम्पूर्णरूपेण लोकतान्त्रिकप्रशासनव्यवस्थासीत्। एवं क्रमेण प्राच्यजगति लोकतन्त्रस्य उत्थानपतनस्य गाथा चर्चिता।

**लोकतन्त्रस्य क्रमविकाशविषये वैविध्यता –**

प्राच्य-पाश्चात्योभयसिद्धान्ते लोकतन्त्रस्योत्पत्ति: जातेऽपि तस्य क्रमविकाशपथि वैविध्यतां परिलक्ष्यते। पाश्चात्यराजनैतिकदर्शनानां क्रमगतविकाशवलेन लोकतन्त्रस्योत्पत्ति: परिकल्पिता किन्तु प्राच्यराजनीते: सर्वप्रथमं लोकतन्त्रमिति आदर्शस्य चरमोत्कर्षरूपं वैराज्यावस्थाया: वर्णनं संप्राप्यते। तद्वैराज्याव्यवस्थादनन्तरं मात्स्यन्यायस्य प्रवर्तनादनन्तरं च राज्यसंस्थाया: उदय: संजात: इति अथर्वसंहितायामुल्लेखितम्।[६०]

इहोल्लेखनीयं यत् पाश्चात्यदेशे बहुविवर्तनादनन्तरं क्रमश: लोकतन्त्रं स्थापितम्। प्राच्यदेशे तु सर्वप्रथमं सर्वोत्कृष्टं लोकतन्त्रं वैराज्याख्यं शासनविधानस्य प्रचलनमासीत्। तत: क्रमश: सा व्यवस्था पतिता, मात्स्यन्याय: समागत:। तत: पुन: राजतन्त्रादित: प्रारभ्य अधुना संप्राप्ता लोकतन्त्रनामाख्या शासनव्यवस्था प्रतिष्ठिता। एतदेव प्राच्यपाश्चात्ययो: लोकतन्त्रविषये क्रमविकाशस्य पार्थक्यम्।

**लोकतान्त्रिकादर्शस्य कालगत वैविध्यता –**

लोकतन्त्रस्योद्भव: प्राचीन ग्रीकदेशस्य एथेन्स्-नगरे अभवदिति सर्वैरेव स्वीक्रियते। अनुसन्धातृभि: राजनैतिकशास्त्रविद्भिश्च तस्योत्पत्तिकालं खीष्टपूर्पञ्चमशतिकायामिति उच्यते।[६१] किन्तु प्राच्यदेशे विश्वस्य सर्वप्राचीनसाहित्ये अस्यादर्शस्योल्लेखं समुपलब्धम्। अस्य सर्वप्राचीनसाहित्यस्य कालस्तु न निर्धारित: न च निर्धारयितुं शक्यते। सृष्टेर्प्रारम्भकालादेव अस्योच्चतमादर्शयुक्ताया: व्यवस्थाया: परिकल्पनं प्राच्यदेशे सञ्जातम।

**सैद्धान्तिकवैविध्यम् –**

प्राच्य-पाश्चात्ययो: राजनैतिकशास्त्रस्याध्ययनादनन्तरं लोकतन्त्रस्यावधारणा व्याख्यावसरे लोकतन्त्रात्मकानां कतिपयविषयाणां पर्यावेक्षणे सैद्धान्तिकपक्षस्य वैविध्यताएवं प्राप्यते -

१. प्राच्यजगति विकशितलोकतान्त्रिकधारणायां शासनं सदैवधर्माश्रितं परिलक्ष्यते। तद्वैदिककाले धर्माश्रित्यैव जनानां सुश्रृङ्खलितजीवनं चलति स्म। परन्तु को नाम धर्म:? इति प्रश्नस्योत्तरमन्वेषणसमये "यज्ञेन यज्ञमजयन्त देवा:"[६२] इति मन्त्रस्योल्लेखं कर्तुं शक्यते।जना: यज्ञमाध्यमेनैव देवपूजा-संगतिकरण-दानेभ्य: स्वकीयं जीवनं महानतां नयेयुरिति प्रथमो नियम:।[६३] ते नियमा: एव धर्मरूपेण गण्यन्ते स्म। अत: ते धर्मा: एव सृष्टेरनन्तरं प्रथममाविर्वभूव। धर्ममाश्रित्यैव सूर्याचन्द्रमसौ धाता यथा पूर्वसु सृष्टिसु कल्पिता: आसन् तथैव एतस्मिन्नपि सृष्टौ तेषामुत्पत्ति: जात:।एतद् कार्यमपि धर्मनियन्त्रितमासीत्। धर्मनियन्त्रितत्वादेव राजनीतिशास्त्रस्यापर: नाम: राजधर्मानुशासनमिति जातम्।

किन्तु पाश्चात्यचिन्तने लोकतन्त्रस्यादर्शे धर्मस्य साक्षात् स्थानं न वर्तते। अपितु नीति-नियमानां बन्धनेन लोकतन्त्रस्य एकं परिष्कृतरूपं प्राप्यते। प्राच्यचिन्तायां प्रवर्तितं धर्मतत्वं मूलत: जीवनधारणस्य नीतिरूपेण उपलभ्यते।[६४]

प्राच्यजगति विकशितस्य धर्मस्यादर्शस्तु नैसर्गिकनीतिरस्ति यत्र च पाश्चात्यजगतिविकशित-नीतय: मानवनिर्मिता: वर्तन्ते।

२. पाश्चात्यलोकतान्त्रिकादर्शे अधिकारं विशेषमहत्वं प्रदीयते। लोकतान्त्रिकराष्ट्रस्थजनान् प्रति मौलिक-गौणोभयप्रकारस्याधिकारान् प्रयोगपूर्वकं तेषां स्वधीनतां संरक्षते। तत्र लोकतान्त्रिकादर्शे राजनैतिकाधिकारप्रदानेन शासकचयनावसरं च प्रयच्छते।

किन्तु प्राच्यलोकतन्त्रादर्शे अधिकारात् कर्तव्यं प्रति अधिकतरं गुरूत्वं प्रदीयते। वेदादिशास्त्रात्[६५] प्रारभ्य: लौकिकग्रन्थेषु[६६] कर्मयोगस्य निरवच्छिन्नवर्णनेन प्राच्यचिन्तायां कर्मयोगस्य महत्वं प्रमाणीयते। वैदिकराष्ट्रे शासक-शासितोभयजनै: स्वस्य कर्तव्यपालनेन एक: सुश्रृङ्खलितस्य समाजस्य प्रतिच्छवि: संहिता-दर्पणे प्रस्तुता। ते कुत्रचित् परतन्त्रस्य

विरोधप्रदर्शनपूर्वकं स्वयमेव परतन्त्रात्मकस्य तत्वस्य समूलविनाशार्थं उद्यताश्च दृश्यन्ते।[६७]

**उपसंहार:**

अनेन पर्यालोचनेन प्राप्तं यत् प्राच्यलोकतन्त्रादर्श: पाश्चात्यलोकतान्त्रिकव्यवस्थात: उत्कृष्टो विद्यते। प्राच्यसंस्कृत्यां राष्ट्रं राष्ट्रभाषा राष्ट्रभक्ति: राष्ट्रिय भावना च सर्वोपरि वर्तते। इह 'मातृ देवो भव, पितृ देवो भव' इति वत् 'राष्ट्र देवो भव' इत्यपि उपदिश्यते। राष्ट्रदेवं विहाय कस्मै वा हविं समर्पयाम इति भावना वेदादिशास्त्रे परिलक्ष्यते – "कस्मै देवाय हविषा विधेम" इति। वैदिकभावनायां जना: राष्ट्रस्य सन्ततय: अत: ते न केवलं नागरिका: अपि तु राष्ट्रभक्ताश्च। ते स्वकीये हृदये राष्ट्रं धारयन्ति। अतएव राष्ट्रदेवो भव इत्योद्गार:। परन्तु पाश्चात्यसिद्धान्ते जना: राष्ट्रस्य नागरिका: (citizens) भवन्ति। राष्ट्रस्य निवासीत्वात् ते तद्राष्ट्रिया:।

प्राच्यपाश्चात्योभयदेशस्य राजनीत्या: क्रमविकाशेपि उभयोर्मध्ये वैविध्यता परिलक्ष्यते। पाश्चात्यराजनीत्यां सामन्तप्रथा-मार्क्सवाद-साम्राज्यवादप्रभृतिनां अनेकानां राजनैतिकचिन्तनानां विकाश विलुप्तिश्च परिलक्ष्यते। एतेषां मतवादानां प्रभाव: जनसामान्येषु न तादृश: सुखावह:। प्राच्यराजनीत्यामपि राजतन्त्र-साम्राज्यव्यवस्थादीनां वर्णनं संप्राप्यते। किन्तु प्राच्य-पाश्चात्योभयदेशे विकशितसाम्राज्यव्यवस्थायां पार्थक्यं दृग्गोचरी भवति। पाश्चात्यसाम्राज्यशासने कुत्रचित् शासकानां कठोरशासन-प्रजापीडन-स्वसाम्राज्यवर्द्धनादिकारणात् शासितानां शासकोपरि विरूपभाव: प्राय: परिलक्षते स्म। ते शासका: न कदापि जनप्रिया: आसन्। परन्तु प्राच्यजगति साम्राज्यमपि लोकतन्त्रवत् सुखकरमासीत्। यत: इह वाजपेयेन यज्ञेन सम्राडिति पदवीं प्राप्यते स्म। वस्तुत: न च जन-धन-विनाशपूर्वक: कोऽपि सम्राट् भवेदपितु यज्ञरूप-सुकर्मणा शासक: सम्राट् भवति स्म। न च कस्यापि निधनमिह दृश्यते। अत: वैदिकलोकतन्त्रं पाश्चात्यलोकतन्त्रस्य तुलनायाम् उत्कृष्टतरमिति वक्तुं शक्यते।